योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ६१

एकषष्टितमः सर्गः ६१

श्रीवसिष्ठ उवाच ।

एवमुत्पलपत्राक्ष राघवाघविपर्यये ।

पदमासादयाद्वन्द्वं विशोको भव भूतये ।। १

एतां दृष्टिमवष्टभ्य न मनः परितप्यते ।

घोरे तमसि निर्मग्नं लब्धदीपं शिशुर्यथा ।। २

विवेकावस्थया चेतस्तथैवायाति निर्वृतिम् ।

पतच्छ्वभ्रे दृढतृणप्रचयालम्बनादिव ।। ३

अथैतां पावनीं दृष्टिं भावयित्वाप्युदाहरन् ।

नित्यमेकसमाधानो भव भूषितभूतलः ।। ४

श्रीराम उवाच ।

कथमेकसमाधानं कीदृशं वा मुनीश्वर ।

वाताहतमयूराङ्गरुहलोलं मनो भवेत् ।। ५

श्रीवसिष्ठ उवाच ।

श्रृणु तस्यैव सुरघोः प्रबुद्धस्य सतस्तदा ।

पर्णादस्य च राजर्षेः संवादमिममद्भुतम् ।। ६

राघवैकसमाधानबोधितायोजितात्मनोः ।

परस्परं समालापमिमं प्रकथयामि ते ।। ७

बभूव पारसीकानां पार्थिवः परवीरहा ।

परिघो नाम विख्यातः परिघः स्यन्दने यथा ।। ८

स बभूव परं मित्रं सुरघो रघुनन्दन ।

नन्दनोद्यानसंस्थस्य मदनस्येव माधवः ।। ९

कदाचित्परिघस्याभूदवर्षं मण्डले महत् ।

कल्पान्त इव संसारे प्रजादुष्कृतदोषजम् ।। १०

विनेशुर्जनतास्तत्र बह्वयः क्षुत्क्षामजीविताः ।

ज्वलिते विपिने वह्नौ यथा भूतपरम्पराः ।। ११

तद्दुःखं परिघो दृष्ट्वा विषादमतुलं ययौ ।

तत्याजाश्वखिलं राज्यं दग्धं ग्राममिवाध्वगः ।। १२

प्रजानाशप्रतीकारेष्वसमर्थो विरागवान् ।

जगाम विपिने कर्तुं तपोऽजिनमुनीन्द्रवत् ।। १३

पौराणामपरिज्ञाते कस्मिंश्चिद्दूरकानने ।

समुवास विरक्तात्मा लोकान्तर इवापरे ।। १४

तपश्चरञ्छान्तमतिर्दान्तः कन्दरमन्दिरे ।

स्वयं शीर्णानि शुष्काणि तत्र पर्णान्यभक्षयत् ।। १५

चिरं हुताशवच्छुष्कपर्णान्येवाथ भक्षयन् ।

पर्णाद इति नामासौ प्राप मध्ये तपस्विनाम् ।। १६

ततःप्रभृति पर्णादनामा राजर्षिसत्तमः ।

जम्बूद्वीपे बभूवासौ विख्यातो मुनिसद्मसु ।। १७

ततो वर्षसहस्रेण तपसा दारुणात्मना ।

प्रापदभ्यासवशतो ज्ञानमात्मप्रसादजम् ।। १८

बभूव विगतद्वन्द्वो निराशः शान्तमानसः ।

नीरागो निरनुक्रोशो जीवन्मुक्तः प्रबुद्धधीः ।। १९

विजहार यथाकामं त्रिलोकीमठिकामिमाम् ।

सिद्धसाध्यैः समं साधो सहंसालिरिवाब्जिनीम् ।।२०

एकदा तस्य सदनं हेमचूडमहीपतेः ।

प्राप रत्नविनिर्माणं मेरोः श्रृङ्गमिवापरम् ।। २१

ते तत्र प्राक्तने मित्रे पूजामकुरुतां मिथः ।

पूर्णौ विज्ञातविज्ञेयौ मौर्ख्यगर्भाद्विनिर्गतौ ।। २२

अहो नु बत कल्याणैः फलितं मम पावनैः ।

संप्राप्तवानहं यत्त्वामित्यन्योन्यमथोचतुः ।। २३

आलिङ्गितशरीरौ तावन्योन्यानन्दिताकृती ।

एकासने विविशतुश्चन्द्रार्काविव भूधरे ।। २४

परिघ उवाच ।

परमानन्दमायातं चेतस्त्वद्दर्शनेन मे ।

इन्दुबिम्ब इवोन्मग्नं मनः शीतलतां गतम् ।। २५

अकृत्रिमसुखं प्रेम वियोगे शतशाखताम् ।

प्रयाति पल्वलतटेऽच्छिन्नमूल इव द्रुमः ।। २६

विश्रब्धास्तान्कथालापांस्ता लीलास्तच्च चेष्टितम् ।

संस्मृत्य प्राक्तनं साधो हृष्यामि च पुनःपुनः ।। २७

ज्ञानमेतन्मया प्राप्तं त्वया ज्ञातं यथाऽनघ ।

माण्डव्यस्य प्रसादेन परमात्मप्रसादजम् ।। २८

अद्य कच्चिददुःखस्त्वं कच्चिद्विश्रान्तवानसि ।

परमे कारणे मेराविव भूमण्डलाधिपः ।। २९

कच्चित्परमकल्याण आत्मारामतया तव ।

प्रसादो जायते चित्ते शरदीव सरोम्भसि ।।३०

कच्चित्करोषि समया सुप्रसन्नगभीरया ।

दृष्ट्या सुभग कार्याणि कार्याण्येव नराधिप ।। ३१

निराधिव्याधयो धीराः कच्चित्संपन्नशालयः ।

जनतास्तव देशेषु तिष्ठन्ति विगतज्वरम् ।। ३२

कच्चिदुद्दामफलिनी फलिनीव फलानता ।

धरा तव फलापूरैर्भृशं धारयति प्रजाः ।। ३३

कच्चित्तव दिगन्तेषु चन्द्रस्येवाशुपञ्जरम् ।

तुषारनिकराकारं प्रसृतं पावनं यशः ।। ३४

कच्चिद्रुणगणैरेता दिशो निर्विवरीकृताः ।

त्वया सरोम्भसाऽबाह्या विसानामिव भूमयः ।। ३५

कच्चित्कलमकेदारकोणस्थानेषु दृष्यतीः ।

प्रतिग्रामं कुमार्यस्ते गायन्त्यानन्दनं यशः ।। ३६

कुशलं तव धान्येषु धनेषु विभवेषु च ।

भृत्येषु च कलत्रेषु पुत्रेषु नगरेषु च ।। ३७

आधिव्याधिविहीनेयं कच्चित्कायलता तव ।

फलं फलति पुण्यार्थं यदिहामुत्र चोदितम् ।। ३८

आपातरमणीयेषु वर्तेतात्यन्तवैरिषु ।

कच्चिद्विषयसर्पेषु सविरागं मनस्तव ।। ३९

अहो बत चिरं कालमावां विश्लेषमागतौ ।

कालेन श्लेषितौ भूयो वसन्ताद्रितटाविव ।। ४०

न ता जगति विद्यन्ते सुखदुःखदशाः सखे ।

जीवद्भिर्या न दृश्यन्ते संयोगजवियोगजाः ।। ४१

तथैतास्वतिदीर्घासु दशास्वन्यत्वमागताः ।

भूयो वयमपि श्लिष्टाश्चित्रो हि नियतेर्विधिः ।। ४२

सुरघुरुवाच ।

भगवन्नियतेरस्या गतिं सर्पगतेरिव ।

दैविक्याः को हि जानाति गम्भीरां विस्मयप्रदाम् ।।

त्वमहं च व्यपोह्येति दूरे दूरदशासु च ।

अद्य संघटितौ भूयः किमसाध्यमहो विधेः ।। ४४

वयं त्वद्य महासत्त्व भृशं कुशलिनः स्थिताः ।

त्वदागमनपुण्येन परां पावनतां गताः ।। ४५

पश्य त्वदागमक्षीणपापानां पुण्यपादपैः ।

तथा फलितमस्माकं न यथा वयमाकुलाः ।। ४५

सर्वाः संपत्तयोऽस्माकं राजर्षे संस्थिताः पुरे ।

भवदागमनेनाद्य प्रयाताः शतशाखताम् ।। ४७

विकिरति परितो रसायनाना-

मिव निकरं मधुरं महानुभाव ।

तव वचनमवेक्षणं च पुण्यं

परमपदप्रतिमो हि साधुसङ्गः ।। ४८

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषूपशमप्रकरणे सुरघुनृ० सुरघुपरिघसमागमो नामैकषष्टितमः

सर्गः ।। ६१ ।।